# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- आचार्य-२ (SEM-3)** | **प्रश्नपत्र-३** | **गुणाः - ७०** |
| **विषयः- वास्तुशास्त्रम्** | **CC538** | **समयः - ११ तः ०२** |
| **दिनाङ्कः - २६/११/२०१६** | **सन्दर्भग्रन्थः -मयमतम्** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोलिखितयोः एकस्य सान्वयं व्याख्यां कुरुत ।** **०४**

१. समं त्रिपादमर्धं वा मुखमण्डपमिष्यते ॥
मण्डपोर्ध्वं यथा हर्म्यं तथालङ्कारमीरितम् ।
कूटकोष्ठारिसंयुक्तं मण्डपं सर्वहर्म्यके ॥

२. नासिका स्वस्तिकाकारा सर्वत्र परिशोभिता ।
नानामसूरकस्तम्भवेदीजालकतोरणम् ॥

**प्र-२ त्रिभूमिविधाने भद्रकोष्ठं प्रतिपादयत ।** **१२**

**अथवा**

**प्राकारपरिवारविधानं ग्रन्थाधारेण स्पष्टयत ।**

**प्र-३ द्वयोरुत्तरं लिखत ।** **०४**

१. एकभूमिविधाने गर्भगृहमानं लिखत ।

२. द्विभूमिविधाने खण्डभवनस्य लक्षणं लिखत ।

३. भद्रकूटलक्षणं दर्शयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-४ निम्नलिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०४**

१. द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यके ।
गोपुरेण तु पञ्चैते द्वारशोभादि पञ्चसु ॥

२. पादोच्चाधर्मधिष्ठानं सामान्यं सर्ववस्तुषु ।
पादोच्चे पञ्चभागे तु द्विभागोच्चे तु वा तलम् ॥
स्तम्भोस्तेधत्रिभागैकं वा मसूरकतुङ्गकम् ॥

**प्र-५ गोपुरविस्तारमानविधानं ग्रन्थाधारेण प्रतिपादयत ।** **१२**

**अथवा**

**मण्डपप्रथालक्षणं ग्रन्थाधारेण विशदयत ।**

**प्र-६ द्वयोरुपरि टिप्पणीं लिखत ।** **०४**

१. मालिकामण्डपम् ।

२. पद्मकुण्डलक्षणम् ।

३. आहल्यमण्डपलक्षणम् ।

## ॥ तृतीयान्विति: ॥

**प्र-७ अधोलिखितयो: एकस्य सान्वयं व्याख्या कार्या । ०४**

१. व्यासे द्विसप्तभागे तु द्विभागं मध्यमाङ्गणम् ।
परितो मार्गमेकांशं द्वयंशं शालाविशालकम् ॥

२. सर्वासामपि वक्ष्ये पादायामं तु तस्य विष्कम्भम् ।
सार्धद्विहस्तमादित्रिभिरथषड्भि: कराग्रजद्वर्या तु ॥

**प्र-८ कस्यचिदेकस्य वर्णनं कुरुत । ०८**

१. एकशालासामान्यलक्षणम् ।

२. शालाविधाने आयादिलक्षणम् ।

**प्र-९ निम्नलिखितेषु त्रयाणामतिलघूत्तरं ददातु । ०३**

१. विप्रादिवर्णानां भवने वंशद्वारं स्थाप्यते न वा ?

२. शालोत्सेधभेदा: कति ?

३. मौलिकभवनस्य शीर्षस्य आकार: कीदृश: ?

४. दण्डवक्त्रभवनं कति मुखोपेतं भवति ?

५. व्याख्यां कुरुत – विमानम् ।

## ॥ चतुर्थान्विति: ॥

**प्र-१० निम्नलिखितयो: एकस्य सान्वयं व्याख्यां कुरुत । ०४**

१. मर्मशूलं च यत्नेन वर्जयेद् वास्तुकोविद: ।
सूत्रादीनां गृहाङ्गैश्च पीडा चेत् सर्वनाशनम् ॥

२. पर्यङ्कोपरितल्पबन्धने शयने दीपतुरीयसंयुते ।
निवसेदम्बरवेष्टिते शुभे स्थपति: शम्बरमुच्यते सदा ॥

**प्र-११ एकस्य सविस्तरं वर्णनं कुरुत । ०८**

१. चतुर्गृहविधाने वाटभित्तिविधानं वर्णयत ।

२. वास्तुपदमण्डलेदेवानां बलिदानविधानं दर्शयत ।

**प्र-१२ निम्नलिखितेषु त्रयाणामुत्तरं लिखत । ०३**

१. ब्राह्मणगृहे मध्यवेदिकाया: महत्त्वं किम् ?

२. पिण्डशालाया: मध्यभागे स्तम्भस्थापनं कर्तुं शक्यते न वा ?

३. गृहनिर्माणे मर्मस्थानपीडिते किं फलम् ?

४. वास्तुपदमण्डलानुसारेण पूर्वदिशायां कस्मिन् पदे द्वारं स्थापनीयम् ?

५. कस्मिन् संक्रान्त्याम् अन्नगृहस्य निर्माणं करणीयम् ?

*****